योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०७३

त्रिसप्ततितमः सर्गः ७३

श्रीराम उवाच ।

बन्धमोक्षजगद्बुद्धिर्न शून्या नापि सन्मयी ।

नास्तमेति न चोदेति किमप्याद्यमसौ किल ।। १

उपदिष्टमिदं ब्रह्मंस्त्वया बुद्धमलं मया ।

भूयः कथय तृप्तिर्हि श्रृण्वतो नास्ति मेऽमृतम् ।। २

सर्गादिसंभ्रमदृशः शून्यतादिदृशस्तथा ।

न काश्चन विभो सत्या असत्याश्च न काश्चन ।। ३

एवंस्थिते तु यत्सत्यं तत्सर्वं बुद्धवानहम् ।

तथापि भूयोबोधाय सर्गानुभव उच्यताम् ।। ४

श्रीवसिष्ठ उवाच ।

यदिदं दृश्यते किंचिज्जगत्स्थावरजङ्गमम् ।

सर्वं सर्वप्रकाराढ्यं देशकालक्रियादिमत् ।। ५

तस्य नाशे महानाशे महाप्रलयनामनि ।

ब्रह्मोपेन्द्रमरुद्रुद्रमहेन्द्रपरिणामिनि ।। ६

शिष्यते शान्तमत्यच्छं किमप्यजमनादि सत् ।

यतो वाचो निवर्तन्ते किमन्यदवगम्यते ।। ७

सर्षपापेक्षया मेरुर्यथातिवितताकृतिः ।

तथाकाशमपि स्थूलं शून्यं सद्यदपेक्षया ।। ८

शैलेन्द्रापेक्षया सूक्ष्मा यथेमे त्रसरेणवः ।

तथा सूक्ष्मतरं स्थूलं ब्रह्माण्डं यदपेक्षया ।। ९

अमानकलिते सौम्ये काले परिणते चिरम् ।

शान्ते तस्मिन्परे व्योमन्याद्ये ह्यनुभवात्मनि ।। १०

असंकल्पो महाशान्तो दिक्कालैरमिताकृतिः ।

अन्तर्महांश्चिदाकाशो वेत्तीव परमाणुताम् ।। ११

असत्यामेव तामन्तर्भावयन्स्वप्नवत्स्वतः ।

ततः स ब्रह्मशब्दार्थं वेत्ति चिद्रूपतां तताम् ।। १२

चिद्भावोऽनुभवत्यन्तश्चित्त्वाच्चिदणुतां निजाम् ।

तामेव पश्यतीवाथ ततो द्रष्टेव तिष्ठति ।। १३

यथा स्वप्ने मृतं पश्यत्येक एवात्मनात्मनि ।

मृत एव मृतेर्द्रष्टा तथा चिदणुरात्मनि ।। १४

ततश्चिद्भाव एषोऽन्तरेक एव द्वितामिव ।

पश्यन्स्वरूप एवास्ते द्रष्टृदृश्यमिव स्थितः ।। १५

चिद्भावशून्य एवातिनिराकारोऽप्यणुं तनुम् ।

पश्यन्दृश्यमिवोदेति द्रष्टेव च तदा द्विताम् ।। १६

प्रकाशमणुमात्मानं पश्यंस्तदनुभावतः ।

उच्छूनतां चेतयते बीजमङ्कुरतामिव ।। १७

देशकालक्रियाद्रव्यद्रष्टृदर्शनदृग्दृशः ।

अर्थान्तरस्वभावेन तिष्ठन्त्यनुदिताभिधाः ।। १८

चिदणुर्यत्र भातोऽसौ देशो मितिमुपागतः ।

यदा भातस्तदा कालो यद्भानं तत्क्रिया स्मृता ।। १९

उपलब्धं विदुर्द्रव्यं द्रष्टृताप्युपलब्धता ।

आलोकनं दर्शनता दृगालोकनकारणम् ।। २०

एवमुच्छूनता भाति मितानन्ताथ वा क्रमात् ।

असत्यैव नभस्येव नभोरूपैव निष्क्रमा ।। २१

चिदणोर्भासनं भातं तत्प्रदेशेन देहगम् ।

येन पश्यति तच्चक्षुः संग्रहोऽक्षदृशामिति ।। २२

चिदणुप्रतिभासेऽन्तः प्रथमं नामवर्जितम् ।

तन्मात्रशब्दमेतेषामेतदाकाशरूपि तत् ।। २३

चिदणुप्रतिभाकाशपिण्ड एव घनस्थितिः ।

अनुसंधानविवशश्चेततीन्द्रियपञ्चकम् ।। २४

एवं चिदणुसंधानं दृश्यपोषमुपैत्यलम् ।

तदेव ज्ञानमित्युक्तं बुद्धिरित्यभिधीयते ।। २५

ततो मनस्तदारूढमहंकारपदं गतम् ।

देशकालपरिच्छेद इत्यङ्गीकृत आत्मना ।। २६

चिदणोरस्य भावस्य प्रत्यग्रं यत्र वेदनम् ।

स तत्रोत्तरकालेन पूर्वाभिख्यां करिष्यति ।। २७

अन्यस्मिन्नेकदेशे सा ऊर्ध्वाभिख्यां करिष्यति ।

एवं दिगभिधानादि कल्पयिष्यति स क्रमात् ।। २८

देशकालक्रियाद्रव्यशब्दानामर्थवेदनम् ।

भविष्यति स्वयमसावाकाशविशदोऽपि सन् ।। २९

इत्थं स्वानुभवेनैष व्योम्नैव व्योमरूपभृत् ।

आतिवाहिकनामान्तर्देहः संपद्यते चितेः ।। ३०

एष एव चिरं कालं तत्र भावनया तया ।

गृह्णाति निश्चयं पूर्णमाधिभौतिकमात्मनः ।। ३१

व्योम्ना व्योम्न्येव रचितो निर्मलेनेति विभ्रमः ।

असता सत्समास्तीर्णस्तापनद्या जलं यथा ।। ३२

संकल्पनामुपादत्ते स्वदेहे गगनाकृतिः ।

शिरःशब्दार्थदां कांचित्पादशब्दार्थदां क्वचित् ।। ३३

उरःपार्श्वादिशब्दार्थमयीं क्वचिदनाविलाम् ।

भावाभावग्रहोत्सर्गशब्दाद्यर्थमयीमपि ।। ३४

नियताकारकलनां देशकालादियन्त्रिताम् ।

विषयोन्मुखतां यातामिन्द्रियव्रातवेधिताम् ।। ३५

सोणुः पश्यत्यथाकारमात्मनः स्वात्मकल्पितम् ।

हस्तपादादिकलितं चित्तादिकलनान्वितम् ।। ३६
एवं संपद्यते ब्रह्मा तथा संपद्यते हरिः ।
एवं संपद्यते रुद्र एवं संपद्यते कृमिः ।। ३७
न च किंचन संपन्नं यथास्थितमवस्थितम् ।
शून्यं शून्ये विलसितं ज्ञप्तिर्ज्ञप्तौ विजृम्भिता ।। ३८
प्रतिकन्दः शरीराणां बीजं त्रैलोक्यवीरुधाम् ।
सर्गार्गलप्रदो मुक्तेः संसारासारवारिदः ।। ३९
कारणं सर्वकार्याणां नेता कालक्रियादिषु ।
सर्वाद्यः पुरुषः स्वैरमित्यनुत्थित उत्थितः ।। ४०
नास्य भूतमयो देहो नास्यास्थीनि शरीरके ।
अवष्टब्धुमसौ मुष्ट्या शक्यते न तु केनचित् ।। ४१
तेनाब्धिमेघसंग्रामसिंहगर्जोर्जितात्मना ।
अपि सुप्तनरेणेव नूनं मौनवता स्थितम् ।। ४२
जाग्रतः स्वप्नसंदृष्टयोद्धारभटिवेदनम् ।
यथा स्मृतिगतं नासन्न सत्तद्वदसौ स्थितः ।। ४३
बहुयोजनलक्षौघप्रमाणोऽपि बृहद्वपुः ।
परमाण्वन्तरे भाति लोमान्तस्थजगत्त्रयः ।। ४४
कुलशैलगुणौघात्मा जगद्धन्दात्मकोऽपि सन् ।
कुलायं धानकामात्रमपि नो पूरयत्यजः ।। ४५
जगत्कोटिशताभोगविस्तीर्णोऽप्यणुमात्रकम् ।
वस्तुतो व्याप्तवानेष न देशं स्वप्नशैलवत् ।। ४६
स्वयंभूरेष कथितो विराडेष स उच्यते ।
ब्रह्माण्डात्मा जगद्देहो वस्तुतस्तु नभोमयः ।। ४७
सनातन इति प्रोक्तो रुद्र इत्यपि संज्ञितः ।
इन्द्रोपेन्द्रमरुन्मेघशैलजालादिदेहकः ।। ४८
तेजोणुमात्रं प्रथितं चेतित्वात्प्रथमं वपुः ।

क्रमेण स्फारसंवित्तिर्महानहमिति स्थितः ।। ४९

स्पन्दसंवेदनात्तेन स्पन्द इत्यनुभूयते ।

यः स एवानिलाभिख्यो वातस्कन्धात्मना स्थितः।। ५०

प्राणापानपरिस्पन्दो वेदनादनुभूयते ।

तेन यः सोऽयमाकाशे वातस्कन्ध उदाहृतः ।। ५१

चित्ताद्ये कल्पितास्तेन बालेनेव पिशाचिकाः ।

तेजःकणा असन्तोऽपि त एते धिष्ण्यतां गताः ।।५२

प्राणापानपरावर्तदोला तदुदरोदिता ।

वातस्कन्धाभिधां धत्ते जगत्तद्धृदयं महत् ।। ५३

प्रतिच्छन्दशरीराणां प्रथमं बीजमेष सः ।

जगद्गतानां सर्वेषामाकल्पव्यवहारिणाम् ।। ५४

प्रतिच्छन्द्याद्यदेतस्मादुत्थिता जगदात्मना ।

देहास्तदा यथा बाह्यमन्तरेषां तथा स्थितम् ।। ५५

चितिस्तस्याद्यबीजस्य पूर्वमेव यथोदिता ।

तथैवाद्यापि जीवेऽन्तस्तथोदेति तदीहिता ।। ५६

श्लेष्मपित्तानिलास्तस्य चन्द्रार्कपवनास्त्रयः ।

ग्रहा ऋक्षगणास्तस्य प्राणाष्ठीवनसीकराः ।। ५७

तस्यास्थीन्यद्रिजालानि मेदसो जातिका घनाः ।

शिरः पादौ त्वचं देहान्पश्यामस्तस्य नो वयम् ।। ५८

वपुर्विराजो जगदङ्ग विद्धि

संकल्परूपस्य हि कल्पनात्म ।

आकाशशैलावनिसागरादि

सर्वं चिदाकाशमतः प्रशान्तम् ।। ५९

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे उत्तरार्धे पाषाणो० विराडात्मवर्णनं नाम त्रिसप्ततितमः सर्गः ।।७३ ।।